"नैमित्तिकलयं प्रपञ्चयिष्यन्निमेषादिक्रमेण प्रथमां-
श्लोकमेव कल्पप्रमाणमनुस्मारयति निमेष इति
सप्तभिः । मात्रैव मात्रं प्रमाणं यस्य । एक-
मात्रलघ्वक्षरोच्चारणकालसंमितो हि निमेषः ।
निमेषकालतुल्या हि मात्रा लघ्वक्षरस्य यदिति
ब्रह्माण्डोक्तेः । ॰नाड़िकाज्ञानोपायमाह ।
उन्मानेनेति सार्द्धेन । अथस उन्मानेन उन्मी-
यते अनेनेत्युन्मानं पात्रम् । अर्द्धेन योगे त्रयो-
दशसार्द्धद्वादशेत्यर्थः । उन्मानरूपेण घटितानि
सार्द्धद्वादशपलानि सा नाड़िका । सार्द्धद्वादश-
पलताम्रनिर्म्मितपात्रेण सा नाड़िका ज्ञातव्ये-
त्यर्थः । किं प्रमाणं तत् पात्रं कार्य्यं तदाह
मागधेन प्रमाणेन जलप्रस्थस्तु संस्तृत इति ।
सार्द्धद्वादशपलजलेन हि मागधदेशप्रस्थः पूर्य्यते ।
तत्प्रमाणं पात्रं कार्य्यमित्यर्थात् सिद्धम् । ननु
तथापि पात्रेण कथं नाड़िकाज्ञानं क्रियापरि-
च्छेद्यत्वात् कालस्येत्याशङ्क्य क्रियासिद्धये ॥
प्रस्थादि विशिनष्टि हेमेति । माषः पञ्चगुञ्जः ।
हेम्नो माषैश्चतुर्भिश्चतुरङ्गुलेन शलाकारूपेण
रचितैः कृतच्छिद्रा । एतदुक्तं भवति सार्द्ध-
द्वादशपलताम्रमयं मागधप्रस्थसंमितमूर्द्ध्वायतं
पात्रं चतुर्म्माषचतुरङ्गुलहेमशलाकया कृताध-
श्छिद्रं जले स्थापितं तेन छिद्रेण यावता कालेन
पूर्य्यते तावान् कालो नाड़िकेति । तथा च शुक्रः ।
द्वादशार्द्धपलोन्मानं चतुर्भिश्चतुरङ्गुलैः ।
स्वर्णमाषैः कृतच्छिद्रं यावत् प्रस्थजलप्लुतमिति ॥")
इति तट्टीकायां श्रीधरस्वामी ॥ (यथा, सूर्य्य-
सिद्धान्ते । १ । १९ ।

"षड्भिः प्राणैर्विनाड़ी स्यात् तत् षष्ट्या नाड़िका
स्मृता ॥"

"षड्भिरिति । षट्प्रमाणैरसुभिः पानीयपलं
भवति पलानां षष्ट्या घटिकोक्ता कालतत्त्वज्ञैः ॥"
इति तट्टीका ॥)

नाड़िकेलः, क्ली, (नारिकेलः । रस्य ड़त्वम् ।)
नारिकेलः । इत्यमरटीकायां भरतः ॥

नाड़िचीरं, क्ली, (नाड़िरिव चीरं यत्र ।) निर्व्वे-
ष्टनम् । इति हारावली । २१४ ॥ नली इति
भाषा ॥

नाड़िन्धमः, पुं, (नाड़ीं वंशनलीं धमतीति । ध्मा
शब्दाग्निसंयोगयोः + "नाड़ीमुष्ट्योश्च ।" ३ ।
२ । ३० । इति खश् । "पाघ्राध्मास्थेति ।" ७ ।
३ । ७८ । इति धमादेशः । "खित्यनव्ययस्य ।"
६ । ३ । ६६ । इति पूर्व्वपदस्य ह्रस्वः ।) स्वर्ण-
कारः । इत्यमरः । २ । १० । ८ ॥ (उच्चनीचा-
शिरोहत्यात् मुहुर्मुहुर्निश्वासैर्नाड़ीं धमति उप-
तापयतीति । श्वासकारके, त्रि । यथा, भट्टिः ।
६ । ९४ ।

"सलक्ष्मेजयसिंहाढ्यान् स्तनन्धयसमत्विषौ ।
कथं नाड़िन्धमान् मार्गानागतौ विषमो-
पलान् ॥")

नाड़िन्धयः, त्रि, (नाड़ीं धयतीति । धेट् पाने +
"नाड़ीमुष्ट्योश्च ।" ३ । २ । ३० । इति खश् ।
"खित्यनव्ययस्य ।" ६ । ३ । ६६ । इति ह्रस्वः ।)
नाड़ीपानकर्त्ता । इति मुग्धबोधव्याकरणम् ॥

नाड़िपत्रं, क्ली, (नाड़िरिव पत्रं यस्य ।) नाड़ी-
चम् । इति शब्दमाला ॥

नाड़ी, स्त्री, (नाड़ि + "कृदिकारादक्तिनः ।"
इति वा ङीष् ।) नालम् । व्रणान्तरम् । (नाली
घा इति भाषा । यथा, सुश्रुते निदानस्थाने १०
अध्याये ।

"तस्यातिमात्रगमनाद्गतिरित्यतश्च
नाड़ीव यद्वहति तेन मता तु नाड़ी ॥"

दन्तमूलगता नाड्यो यथा, तत्रैव १६ अध्याये ।
"नालास्रावी कफक्षतो विज्ञेयः सोऽधिमांसकः ।
दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः ॥")
शिरा । गण्डदूर्व्वा । कुहनचर्य्या । षट्क्षण-
कालः । इति मेदिनी । डे, १६ ॥ शिरार्थे
पर्य्यायः । धमनिः २ सिरा ३ । इत्यमरः । २ ।
६ । ६५ ॥ नाड़िः ४ नालिः ५ नाली ६ धमनी
७ शिरा ८ । इति भरतः ॥ धरणी ९ धरा १०
तन्तुकी ११ जीवितज्ञा १२ सिंहा १३ । इति
राजनिर्घण्टः ॥ * ॥ कायनाड़ी त्रिविधा ।
एका वायुवहा । अपरा मूत्रविड़स्थिरस-
वाहिनी । अपरा आहारवाहिनी । इति
भरतः ॥ "सा तु गर्भस्थबालकस्य सप्तभिर्मासै-
र्भवति ।" इति सुखबोधः ॥ (यथा, तोड़लतन्त्रे
८ उल्लासे ।

श्रीदेव्युवाच ।

"सार्द्धत्रिकोटिनाड़ीनामालयश्च कलेवरम् ।
क्रमेण श्रोतुमिच्छामि तद्वदस्व मयि प्रभो ! ॥

श्रीशिव उवाच ।

लोम्नि कूपे सपादार्द्धकोटयश्चैव सुन्दरि ! ।
हस्तास्ये च तथा पादेऽमिलक्षनाड़यः स्थिताः ॥
उदरे च तथा पायौ पञ्चलक्षाः प्रकीर्त्तिताः ।
हृदादिसर्व्वगात्रेषु नवलक्षाः प्रकीर्त्तिताः ॥
अथ पार्श्वे तथा चर्म्मे तथैव सर्व्वसन्धिषु ।
यद्यान्यूनं स्थितं लक्षं शरीरे नाड़यः प्रिये ! ॥
ईड़ा च पिङ्गला चैव सुषुम्ना चित्रिणी तथा ।
ब्रह्मनाड़ी च यन्मध्ये पञ्च नाड्यः प्रकीर्त्तिताः ॥
कुहूश्च शङ्खिनी चैव गान्धारी हस्तिजिह्विका ।
नहिंषी च तथा निद्रा चन्द्रसंख्या व्यवस्थिता ॥
एता नाड्यः परेशानि ! सुषुम्नायाः प्रजायते ॥")

नाड़ीक्रममाह ।

"सार्द्धत्रिकोट्यो नाड्यो हि स्थूलाः सूक्ष्माश्च
देहिनाम् ।
नाभिकन्दनिबद्धास्तास्तिर्य्यगूर्द्धमधःस्थिताः ॥
द्विसप्ततिसहस्रन्तु तासां स्थूलाः प्रकीर्त्तिताः ।
देहे धमन्यो धन्यास्ताः पञ्चेन्द्रियगुणावहाः ॥

तासाञ्च सूक्ष्मसुषिराणि शतानि सप्त
स्युस्तानि यैरसकृदन्नरसं वहद्भिः ।
आप्याय्यते वपुरिदं हि नृणाममीषा-
मम्भःस्रवद्भिरिव सिन्धुशतैः समुद्रः ॥
आपादतः प्रततगात्रमशेषमेषा-
मामस्तकादपि च नातिपुरःस्थितेन ।
एतन्मृदङ्ग इव चर्म्मचयेन नद्धं
कायं नृणामिह शिराशतसप्तकेन ॥

सप्तशतानां मध्ये चतुरधिका विंशतिः स्फुटा
तासां एका परीक्षणीया या दक्षिणकरचरण-
विन्यस्ता । चतुरधिकेति तदुक्तम् ।

तिर्य्यक् कूर्म्मो देहिनां नाभिदेशे
वामे वक्त्रं तस्य पुच्छञ्च याम्ये ।
ऊर्द्ध्वे भागे हस्तपादौ च वामौ
तस्याधस्तात् संस्थितौ दक्षिणौ तौ ॥

वक्त्रे नाड़ीद्वयं तस्य पुच्छे नाड़ीद्वयन्तथा ।
पञ्च पञ्च करे पादे वामदक्षिणभागयोः ॥
तासां मध्ये एकेति एकस्या एव पादादूर्द्ध्वंगम-
नात् दक्षिणेति प्राधान्यं पुरुषाश्रया । यदुक्तम् ।
वामे भागे स्त्रिया योज्या नाड़ी पुंसस्तु दक्षिणे ।
इति प्रोक्ता मया देवि ! सर्व्वदेहेषु देहिनाम् ॥"
नपुंसकस्य तु स्त्रीपुंसयोरन्यतराकारप्रकटता-
मपेक्ष्य परीक्षा । साम्यन्तु न स्यादेव । कृत्रि-
मस्य तु प्रकृतिस्थता । चरणेति वामस्य तु
दक्षिणग्रन्थिपश्चात् पार्श्वस्था दक्षिणस्य तु वाम-
ग्रन्थिपश्चात् पार्श्वस्थैव सदुपदेशात् । करस्था
तु वक्ष्यते ॥ * ॥
परीक्षाप्रकारमाह ।

सव्येन रोगहतिकूर्परभागभाजा
पीड्याथ दक्षिणकराङ्गुलिकात्रयेण ।
अङ्गुष्ठमूलमधिपश्चिमभागमध्ये
नाड़ीं प्रभञ्जनगतिं सततं परीक्षेत् ॥

सव्येन करेण । रोगहतिर्गदधारणमित्यापीड़ने
हेतुः । रोगाणां वातादिपिशुनवायूनां धारणं
यथा स्यात्तथा पीड्येति कश्चित् । भाग इति
वसुदितकफोणिपरं भाजेति परीक्षाकालेऽपि
तत्र हस्तस्थितये । आपीड्येत्यर्थान्नाड़ीं एतच्चा-
पीड़नं वातादिपौर्व्वापर्य्यबोधनाय । अथेत्या-
पीड़नानन्तरं न तु परीक्षाकालेऽप्यापीड़न-
स्थितिः । दक्षिणेति प्रायिकं स्वपरीक्षाया-
मन्यथात्वात् । त्रयेति योग्यतया तर्ज्जनीमध्यमा-
नामिकाग्रहणम् । पश्चिमेत्यङ्गुष्ठस्याधोभागः ।
मूलेति तदुक्तम् ।
अङ्गुष्ठस्य तु मूले या धमनी जीवसाक्षिणी ।
तस्या गतिवशाद्विद्यात् सुखं दुःखञ्च देहिनाम् ॥
प्रभञ्जनगतिश्चेति भाषान्तरनिरासः । सतत-
मिति सुस्थदशायामपि । तदुक्तम् । भावि-
रोगाभिबोधाय सुस्थनाड़ीपरीक्षणमिति ॥ * ॥
परीक्षणीयमाह ।
वातं पित्तं कफं द्वन्द्वं सन्निपातन्तथैव च ।
साध्यासाध्यविवेकञ्च सर्व्वं नाड़ी प्रकाशयेत् ॥
सन्निपातमिति सामान्यतः । साध्यासाध्यमिति
विशेषतश्चेत्यर्थः । सर्व्वमित्यनेनान्यच्च रोगादिक-
मित्युपसंहारः ।" इति नाड़ीप्रकाशे प्रथमो-
द्योतः ॥ * ॥ अथ नाड़ीज्ञानसमयमाह ।
"प्रातः कृतसमाचारः कृताचारपरिग्रहम् ।
सुखासीनः सुखासीनं परीक्षार्थमुपाचरेत् ॥
प्रातरिति प्रायिकं मध्याह्ने उष्णता इत्युक्तेः ॥ * ॥